bavarNAdi shrI buddhAShTottarashatanAmastotram

# बवर्णादि श्रीबुद्धाष्टोत्तरशतनामस्तोत्रम्

## Document Information

Text title : bavarNAdi buddhAShTottarashatanAmastotram

File name : bavarNAdibuddha108nAmastotram.itx

Category : aShTottarashatanAma, vishhnu, dashAvatAra, paNDita-bellaMkoNDa-rAmarAya-kavIndra, vishnu

Location : doc_vishhnu

Author : paNDita shrI bellaMkoNDa rAmarAya kavIndra

Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Source : shrI dashAvatArAShTottara shatanAmAvaliH savyAkhyA

Latest update : January 24, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 28, 2023

*sanskritdocuments.org*

# बवर्णादि श्रीबुद्धाष्टोत्तरशतनामस्तोत्रम्

श्री हयग्रीवाय नमः ।
हरिः ॐ

बुद्धो बुधजनानन्दी बुद्धिमान् बुद्धिचोदनः ।
बुद्धप्रियो बुद्धषड्को बोधिताद्वैतसंहितः ॥ १॥

बुद्धिदूरो बोधरूपो बुद्धसर्वो बुधान्तरः ।
बुद्धिकृत्बुद्धिविद्बुद्धिर्बुद्धिभिद्बुद्धिसत्बुधः ॥ २॥

बुध्यालयो बुद्धिलयो बुद्धिगम्यो बुधेश्वरः ।
बुध्यकामो बुद्धवपुर्बुद्धिभोक्ता बुधावनः ॥ ३॥

बुद्धिप्रतिगतानन्दो बुद्धिमुद्बुद्धिभासकः ।
बुद्धिप्रियो बुध्यवश्यो बुद्धिशोधी बुधाशयः ॥ ४॥

बुद्धीश्वरो बुद्धिसखो बुद्धिदो बुद्धिबान्धवः ।
बुद्धिनिर्मितभूतौघो बुद्धिसाक्षी बुधोत्तमः ॥ ५॥

बहुरूपो बहुगुणो बहुमायो बहुक्रियः ।
बहुभोगो बहुमतो बहुनामा बहुप्रदः ॥ ६॥

बुधेतरवराचार्यो बहुभद्रो बहुप्रधः ।
वृन्दारकावनो ब्रह्म ब्रह्मदूषणकैतवः ॥ ७॥

बह्वैश्वर्यो बहुबलो बहुवीर्यो बहुप्रभः ।
बहुवैराग्यभरितो बहुश्री बहुधर्मवित् ॥ ८॥

बहुलोकजयी बन्धमोचको बाधितस्मरः ।
बृहस्पतिगुरुर्ब्रह्मस्तुतो ब्रह्मादिनायकः ॥ ९॥

ब्रह्माण्डनायको ब्रध्नभास्वरो ब्रह्मतत्परः ।
बलभद्रसखो बद्धसुभद्रो बहुजीवनः ॥ १०॥

बहुभुग्बहिरन्तस्थो बहिरिन्द्रियदुर्गमः ।
बलाहकाभो बाधाच्छिद्विसपुष्पाभलोचनः ॥ ११॥

बृहद्वक्षा बृहत्क्रीडो बृहद्रामो बृहत्प्रियः ।
बृहत्तृप्तो ब्रह्मरथो ब्रह्मविद्ब्रह्मपारकृत् ॥ १२॥

बाधितद्वैतविषयो बहुवर्णविभागहृत् ।
बृहज्जगद्भेददूषी बह्वाश्चर्यरसोदधिः ॥ १३॥

बृहत्क्षमो बहुकृपो बहुशीलो बलिप्रियः ।
बाधिताशिष्टनिकरो बाधातीतो बहृदयः ॥ १४॥

बाधितान्तश्शत्रुजालो बद्धचित्तहयोत्तमः ।
बहुधर्मप्रवचनो बहुमन्तव्यभाषितः ॥ १५॥

बर्हिर्मुखशरण्यं ब्रह्मण्यो ब्राह्मणप्रियः ।
ब्रह्मस्तुतो ब्रह्मबन्धुर्ब्रह्मसूर्ब्रह्मशोऽवतु ॥ १६॥

॥ इति बकारादि श्री बुद्धावताराष्टोत्तरशतनामावलिः
रियं पराभव श्रावणबहुल द्वितीयायां रामेण लिखिता
समर्पिता च श्री हयग्रीवायदेवाय विजयतान्तराम् ॥

Encoded and proofread by Malleswara Rao Yellapragada
malleswararaoy at yahoo.com

Source Book:
shrI dashAvatArAShTottarashatanAmAvaliH savyAkhyA
language: Telugu
Composed by : paNDita shrI bellaMkoNDa rAmarAya kavIndra

*bavarNAdi shrI buddhAShTottarashatanAmastotram*

pdf was typeset on June 28, 2023

Please send corrections to *sanskrit@cheerful.com*